पाक्षिक:संस्कृतप्रभातम्, अजा एकादशी श्रावण: कृ.११ गुरूवासरे युगाब्दे ५११६; दक्षिणायण, अंक: ४ वर्ष: १ दि. २१ आगष्ट: २०१४




## संपादकीय:

मानवा: उत्सवप्रिया: सन्ति । वयं सर्वे गतमासे इस्कॉन कॅम्प मन्दिरे तथा इस्कॉन कोण्ढवा मन्दिरे श्रीश्रीराधाकृष्ण दोलाउत्सवं श्रीबलरामजन्मतिथि उत्सवं श्रीकृष्णजन्मोत्सवं च कृतवन्त:। एतेषु उत्सवेषु वयं बहून् सेवाया: कृतवन्त: । आगामी मासे श्रीराधिकाया: जन्मतिथि अस्ति । सा भाद्रपद शु. अष्टमी मङ्लवासरे अर्थात् २ सप्टेम्बर २०१४ इति । अत: अस्माकं एष: उत्सव करणीय: । कृष्णबलरामौ कौ एतत सर्वे जानन्ति किन्तू राधिका का एतस्मिन् विषये विविधा: मता: सन्ति । सा केवला एका गोपी वा कृष्णस्य प्रेयसी इति संभ्रम: जनेषु मन:सु अस्ति । अत: सा का इति सम्यक ज्ञानम् आवश्यकं अस्ति । वैदिकानि शास्त्राणि पुराणानि च एतत ज्ञानं ददति । श्रीराधिका केवला एका सामान्या: नारी न किन्तु सा श्रीकृष्णस्य अन्तरङ्गा शक्ति अस्ति । सा कृष्णस्य सनातना सङ्गिनी जगज्जननी च । बृहद्गौतमीयतन्त्रे एक: श्लोक: अस्ति ‘ देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्व लक्ष्मीमयी सर्व कान्ति: सम्मोहिनी परा ’।। अर्थात राधिका सर्वासाम लक्ष्मीनाम् प्रमुखा अस्ति । नारदमुनि, शुकदेव, सनकादिकुमारा: एते विरक्ता: मुनय: अपि श्रीराधिकां स्तुवन्ति । श्री शंकराचार्य वदति भौतिकजगत: सौदर्यं केवलं रक्तमांसयो: संयोगस्य प्रदर्शनं एव अस्ति । अत: एतत् केवला माया अस्ति । परन्तु आध्यात्मिकजगत: सौदर्यं श्री राधाकृष्ण मूलसत्यं अस्ति । यदि कोऽपि श्री राधाकृष्णयो: सेवायां आकृष्ट: भवति तर्हि स: रक्तमांसयो: असत्ये सौदर्ये कदाऽपि आकृष्ट: न भवति । एतत दर्शयति राधाकृष्णयो: लीला: दिव्या: विशुध्दा: च । भगवान श्रीचैतन्य महाप्रभो: शिक्षा अस्माकं स्वरूपं गोपीभर्तु: पदकमलयो: दासदासानुदास: इति अस्ति । समासत: एषा परमपवित्रा जन्मतिथि समीपे अस्ति अत: अस्माकं राधिकाया: श्रीचरणौ शरणं गमनीयम् । भक्त्या: अर्थ: प्रेममयि सेवा अत: वयं कृष्णसेवायाचका:। एषा राधिका अर्हनिशं कृष्णस्य सेवायां रत: अस्ति । अत: तस्या: कृपया वयं भगवतसेवां कर्तुं शक्नोम: ।

## काव्यविनोद:




## प्रार्थना

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ।
रतिमुद्वहतादध्दा गङ्गेवौघमुदन्वति ।।

अनुवाद- हे मथुराया: नाथ ! यथा गङ्गा अविरत: सागरं प्रति प्रवहति तथैव मम चेतना अविरत: भवत: चरणौ प्रति प्रवहतु ।

## सम्भाषणम्



चित्रक: - लतिके ! कृपया आगच्छतु । उपविशतु ।
लतिका - धन्यवाद ! भवान् किं करोति?
चित्रक: - अहं भगवद्गीतां पठामि । लतिके ! भवति भगवद्गीतां पठति वा?
लतिका - आम ! अहं पठामि । हे चित्रक ! भगवद्गीतायां कति अध्याया: सन्ति?
चित्रक: - अष्टादशाध्याया: सन्ति सप्तशता: श्लोका: च सन्ति।
लतिका - आम ! श्व: आवां मिलित्वा पठिष्याव: । शक्यम् अस्ति वा?
चित्रक: - आम! ध्यन्यवाद! पुन:मिलाम:।

## चिन्तनीयम्

हनुमता हताऽराम सीता हर्षा समागता ।
सर्वे राक्षसा: रोदन्ति हाहाऽराम हता हता:।

कृपया अनुवादं लिखतु.......................... !

## कथा

### सत्सङ्गस्य लाभः

कश्चित् चोरः आसीत् । एकस्मिन् दिने सः चौर्यार्थं राजभवनं प्रविष्टवान् । तत्र महाराज्ञी शयितवती अस्ति । पार्श्वमञ्चे राजा अपि अस्ति । तयोः परस्परं सम्भाषणं प्रचलति । राज्ञी- "महाराज ! पुत्री विवाहवयस्का इति स्मरति किल भवान् ?" राजा- "प्रिये! स्मरामि तत् । सर्वम् अपि काले सम्भविष्यति । किमर्थम् इदानी त्वरा ?" राज्ञी- "विवाहः युक्ते काले एव भवेत् किल ? तदर्थं शीघ्रं वरान्वेषणं करणीयम् ।" राजा- "भद्रे ! चिन्ता मास्तु !अस्माकं पुत्री सुन्दरी अस्ति । अतः तस्याः कृते वरान्वेषणं न कष्टकरम् ।" राज्ञी- "किम् अतीव सुलभम्? तादृशाः वराः कुत्र सन्ति?" राजा-" नगरस्य समीपे ऋष्याश्रमः अस्ति किल ? तत्र योग्याः ऋषीकुमाराः निवसन्ति । ते विद्यावन्तः, धीमन्तः, सभ्याःच । तेषु कश्चित् योग्यम् ऋषीकुमारम् अन्विष्यामः। पुत्र्याः विवाहं करिष्यामः।" राज्ञी- "तत्र सुन्दराः वराः सन्ति किम्?। अहम् अपि द्रष्टुम् इच्छामि । कदा गच्छाम?" राजा- "त्वरा मास्तु, मम इदानीं राजकार्याणि सन्ति । तथापि सद्यः एव गमिष्यामः" । चोरः एतत् सर्वं श्रुतवान । सः चिन्तितवान् - ' अहम् इदानीं चौर्यं न करोमि । ऋष्याश्रमं गच्छामि । ऋषिकुमार इव आचरामि । राजा आगमिष्यति । मां द्रश्यति । 'मम पुत्र्या : एषः एव वरः भवतु' इति अङ्गीकरिष्यति । भविष्यं कः वा जानाति? इदानीं चौर्येण किञ्चित् एव धनं लभ्येते । यदि य थाकथञ्चित् राजपुत्र्याः पति भविष्यामि, तर्हि समग्रं राज्यम् एव लप्स्यते किल? इति । चोरः ऋष्याश्रमं गतवान। तत्र ऋषिकुमार इव व्यवहारं कृतवान् । आचरणे सहजमा भवेत किल ? तदर्थं चोरः प्रातःकाले उतिष्ठति स्म । पूजनम् अध्ययनम् इत्यादिकम् अपि करोति स्म । मासद्वयम् अतीतम् । चारस्य मनः इदानीम् ऋषिजीवने आसक्तम् । अनन्तरं राजा आगतवान् । सर्वान् अपि ऋषिकुमारान् परिशीलितवान् । चोरं दृष्ट्वा - 'एषः एव वरः भवतु' इति मनसि निर्णीतवान् । चोरसमीपम् आगत्य प्रार्थितवान् - "आर्य! कृपया भवान् मम पुत्र्याः पाणिग्रहणं करोतु" इति । तदानीं चोरः उक्तवान् - "पूर्वम् अहम् एतर्थम् एव प्रयत्नं कृतवान् । ऋषिजीवनस्य अनुकरणं कृतवान् । द्वयमासानि अत्र वासं कृतवान् । इदानीम् तु एतेषां सहवासेन सारासारविवेकं प्राप्तवान् अस्मि । अतः इदानीम् अहं भोगं न इच्छामि" इति । एवम् ऋषिजनानां सहवासेन चोरः अपि ऋषिकुमारः इव निःस्पृहः सञ्जातः



## पदरञ्जनी

### पूर्व पदरञ्जन्याः उत्तरम्

| | | | | | |
|---|---|---|---|---|---|
| ■ | १च | म | स | ■ | २क |
| ३कृ | ष | क | ■ | ४ब | लि |
| ५पा | ६क | ■ | ७व | ■ | ल |
| ■ | ■ | ८ भ | र | ११त | ■ |
| ९ऋ | १२चा | ■ | १०दा | रू | क |
| ■ | १३प | द्म | ■ | ण | ■ |

### पदरञ्जनी

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १ | | ७ | | ■ | १० | ■ | ■ |
| २ | | | ■ | ९ | | १३ | ■ |
| | ■ | ८ | | ■ | ■ | १४ | १७ |
| | ■ | ■ | ■ | ■ | ■ | | |
| ■ | ४ | ■ | ■ | ■ | ११ | | ■ |
| ■ | ५ | | | ■ | | ■ | ■ |
| ■ | ६ | | ■ | ■ | १२ | १५ | १८ |
| ३ | | | | | ■ | १६ | |

**दिगंतसम शब्द** -१. संस्कृतभाषायाः एकः महानः कविः । २. पंकज । ३.ताडनम् । ५. तरूणी । ६. केसरी । ८. रंगः । ९. बुद्धिमानः मनुष्यः । ११. अर्चनाया प्रारंभे एनं वादयते। १२. एषः वस्त्राणि प्रक्षालयति । १४. इन्द्र । १६. महाभारतस्य एकः नृपः । **ऊर्ध्व शब्द** - १. वनम् । ४.विष्णोः एकः अवतारः । ७. देवस्य शत्रुः । १०. सूर्यः । ११. महादेवः । १३. रावणः । १५. मनुष्यः। १७.यज्ञ । १८.मधुरः ।

## सुभाषितम्

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् । आत्मवत् सर्वभूतेषु य : पश्यति सः पण्डितः ।।

अनुवाद- यः जनः परपत्नीं मातरम् इव पश्यति, अन्येषां धनं लोष्टमिव तुश्चं मन्यते, सर्वानपि जीवान् आत्मवत् पश्यति सः एव पण्डितः ।

**श्रीकृष्णजन्माष्टीउत्सवस्य हार्दीकः शुभेच्छा !**

-::-::-:: पक्षिक शारदा ज्ञान पीठम् - संस्कृत पत्रिका । १ झेलम, पत्रकारनगर, पुणे-४११०१६ ::-::-::-::-

प्रकाशनं मुद्रणं च संकेत- धीरशांत दासः, कनाई कृष्ण दासः,पाक्षिकः संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८ अणुपत्रम् संकेत
sanskritprabhatam@gmail.com. d16108@gmail.com, भ्र.ध्व.-८८८८८४४६४८/९४२३२३४४३